## विंशत्यादिभ्यस्तमडन्यतरस्याम् । (५६/१८५६)

विंशत्यादिभ्यः परस्य [1]डटः तमडागमो भवत्यन्यतरस्याम् । [2]पूरणाधिकारात् डट्प्रत्यय आगमी विज्ञायते । विंशतेः पूरणः विंशतितमः, विंशः । एकविंशतितमः, एकविंशः । [3]त्रिविंशतितमः, त्रिविंशः । त्रिंशत्तमः, त्रिंशः । [4]एकत्रिंशत्तमः, एकत्रिंशः ।

विंशत्यादयो लौकिकाः सङ्ख्याशब्दा गृह्यन्ते, न पङ्क्त्यादिसूत्रसंनिविष्टाः । तद्ग्रहणे ह्येकविंशतिप्रभृतिभ्यो न स्यात् । ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् (व्या.प. ८९) । एवं च सति 'षष्ट्यादेश्चासङ्ख्यादेः' (५.२.५८/१८५८) इति पर्युदासो[5]युज्यत [6]एव ॥

## नित्यं शतादिमासार्धमाससंवत्सराच्च । (५७/१८५७)

शतादयः संख्याशब्दाः लौकिका गृह्यन्ते । शतादिभ्यः [7]मासार्धमाससंवत्सरशब्देभ्यश्च परस्य डटो नित्यं तमडागमः भवति । मासादयः संख्याशब्दा न भवन्ति, तेभ्योऽस्मादेव ज्ञापकात् डट् प्रत्ययो [8]विज्ञायते । शतस्य पूरणः शततमः । सहस्रतमः । लक्षतमः । मासस्य पूरणः मासतमो दिवसः । अर्धमासतमः । संवत्सरतमः । 'षष्ट्यादेश्चासङ्ख्यादेः' (५.२.५८/१८५८) इति [9]वक्ष्यमाणेन सिद्धे शतादिग्रहणं सङ्ख्याद्यर्थम् । एकशततमः । द्विशततमः[10] ॥

## षष्ट्यादेश्चासङ्ख्यादेः । (५८/१८५८)

षष्ट्यादेः सङ्ख्याशब्दादसङ्ख्यादेः परस्य डटो नित्यं तमडागमः भवति । विंशत्यादिभ्यः (५. २. ५६/ १८५६) इति[11] विकल्पेन प्राप्ते नित्यार्थम् । [12]षष्टितमः । सप्ततितमः[13] । असंख्यादेः इति [14]किम् ? एकषष्टः, एकषष्टितमः । [15]एकसप्ततः, एकसप्ततितमः ॥

## मतौ छः सूक्तसाम्नोः (५९/१८५९)

मतौ इति मत्वर्थ उच्यते । प्रातिपदिकान् मत्वर्थे छः प्रत्ययो भवति सूक्ते सामनि चाभिधेये । मत्वर्थ-ग्रहणेन समर्थविभक्तिः, प्रकृतिविशेषणं, प्रत्ययार्थः इति [16]सर्वमाक्षिप्यते । अच्छावाकशब्दो[17]ऽस्मिन्निति अच्छावाकीयं सूक्तम् । [18]मित्रावरुणीयम् । यज्ञायज्ञीयं साम । [19]वारवन्तीयम् । [20]अनुकरणशब्दाश्च स्वरूपमात्रप्रधानाः प्रत्ययमुत्पादयन्ति । तेनानेकपदादपि सिद्धम्[21] । अस्यवामीयम् । [22]कयाशुभीयम् ॥

---

1. डट् इत्यस्यान्तरस्याम् तमडागमो भवति ड. 2. पूरणाधिकारडट्प्रत्ययः क. 3. त्रिविंशतितमः नास्ति ड. 4. एकत्रिंशत्तमः नास्ति फ. 5. अपि इत्यधिकम् ड. 6. एव नास्ति क. 7. मासार्धमाससंवत्सरेभ्यः क.फ. 8. भवति क. 9. अनेन इत्यधिकम् फ, एवं इत्यधिकम् क. 10. एकसहस्रतमः इति इत्यधिकम् ब. क. ड.फ. 11. नित्ये प्राप्तेऽनित्यार्थं वचनम् । संख्यादेस्तु विकल्प एव क.ड.ह. 12. षष्टेः पूरणः इत्यधिकम् क.ड.ह. 13. अशीतितमः नवतितमः इत्यधिकम् ह, अशीतितमः इत्यधिकम् क. 14. किमर्थः फ. 15. एकसप्तः ह. 16. सर्वमाक्षिप्यते नास्ति फ. 17. अस्मिन्नस्ति ब.क.ड.ह. 18. मैत्रावरुणीयम् क. 19. वारतन्तुवीयम् क, शारभक्तीयम् ह. 20. अलुक्शब्दाः क. 21. भवति इत्यधिकम् क. 22. तददारीयम् ड.